संज्ञायमिति समासनियमात्॥ प्रत्यये भाषायामिति॥ अत्र प्रावामयरिमित्यमिति पठितं पंचहलेत प्रकरणे षष्मापट्ठ
णामित्यादौ हूतं पंच प्रसादकृतापरोनुनासिक इति वानुनासिक इति व्याख्यातं॥ तदेतत् सर्वं प्रामादिकमेव॥ चिन्मयमिति॥ राम
५८

नित्यं हृद्धशाराद्दिस्प इत्यत्र नित्यमिति योगविभागात्तादृप्येम पट चिन्मयं पत्रह्लेति त्रह्लेति सामानाधिकरण्यमप्यपघते॥ म
यद्वैतयो भीषायामिति विकारावयवयोर्मयडित्यस्याद्दिति भावः॥ उदः॥ तस्मादित्युत्तरस्येत्यनयापरस्य कार्यं विज्ञाय
त इत्याह॥ परयोरिति॥ अनुस्वारस्य ययि पयीत्यत्र परसवर्ण इति समस्तमपि सवर्णग्रहणं निष्कृष्येह संबध्यते॥ एकारे
शस्वरितत्वप्रतिज्ञानात्॥ तदाह॥ सवर्णः स्यादिति॥ उत्थानमुत्तंभनमिति॥ ष्ठा गतिनिवृत्तौ॥ स्तंभि प्रतिबंध इति धातुपाठ पठि
तः स्तंभु रोधन इति श्नुविधौ निर्दिष्टः सौत्रश्च॥ मा वेल्फद॥ अत्र प्राचः॥ सस्य पूर्वसवर्णो न तकारस्तस्य संयोगांतलोपेन रा
कृततकारांतरभावेऽपि तकारं॥ अनविवेतिहि त्वेत्रितकारमित्याहुस्तन्नेत्याह॥ अत्राघोषस्येति॥ अत्र वार्त्तिकं॥ स्कंदेः श्छंदः
स्फयसंख्यानं॥ अघ्नेह्यर मुत्कदेश्रोगे च॥ उत्कंद को रोगः इति॥ न चात्र पकारलोपप्राप्त्यभावात्कथं तल्लोप इति वाच्यं॥
आर्धधात्वंदसत्वात्॥ द्वितीये भाष्ये तथैवोदाहृतत्वादिति॥ झयो हः॥ तस्मादित्युत्तरस्येत्युपतिष्ठते तदाह॥ झयः परस्येति
॥ एच इग्घ्रस्वादेशे इति लिंगात् झय इति पंचम्येवेति भावः॥ उदः स्थास्तंभोरिति सूत्रात्पूर्वसवर्ण इत्यनुवृत्तिमभिप्रेत्याह॥ पू
र्वसवर्ण इति॥ एतेन पूर्वेशाद्दो ध्याहार्य इति केचिदुक्तमपास्तं॥ न च सवर्ण इत्यस्यैवानुवृत्तिरस्तु॥ तस्य स्वरितत्वप्रतिज्ञा
याः क्षतत्वादिति वाच्यं॥ हस्य सवर्णाः सवतीत्यक्रेरेकोष्मणां सवर्णानसंतीत्युक्तं सवर्णांतरविरहे हस्य हकार एव स्यात्॥

५

४८ नचेष्टापत्तिः॥ वचनवैयर्थ्यापत्तेः॥ अतः पूर्वग्रहणस्याप्यनुवृत्तिः कर्त्तव्या॥ अन्यतरस्यामित्यखंडो निपातो विकल्पार्थः॥
तदाह॥ वेति॥ सूत्रे वेत्येव वक्तव्ये गुरुनिर्देशः पर्यायेषु लाघवगौरवं नादरणीयमिति ज्ञापयितुं॥ केचित्तु अन्यतरस्या वा पेस
आम् अंगीकार इति पदद्वयं व्याचक्षते॥ तन्नु अन्यतरस्येत्येव श्लिष्टो वाम ग्रहणं अर्थस्याहिक्युपेस्यं॥ घोषवत इति॥ इह घो
षवतो महाप्राणस्येत्युक्ते न किंचिद्बाधकं तथापि स्पष्टार्थं विशेषणांतरमिति भावः॥ तत्र अमेता विशेषणादुपस्यापि द्वित्ती
पत्तौ पवर्गीयस्यावृत्त्यर्थत्वं इष्टं॥ यांचित्तु येरुवेति॥ नतु रत्ती पद इत्येवकारार्थः॥ अतरतमत्वादिति भावः॥ शश्छोटि॥ झय इति
॥ पदांतादिति शेषः॥ निनविपूर्वाद्दुपेरौणादिके शिनिप्रत्यये विरपूशिमाद्दे नातिव्याप्तिः॥ अतस्व विरपूशी गोमती महो
दुत्यादिवैदिकप्रयोगा अपि न विरुद्धा इति भावः॥ तद्धिव इति॥ इह तत्शिव इति स्थिते जश्त्वे कृते खरि चेति चर्त्वमिति प्रक्रि
याकृतः॥ पक्षे तु तदोदांतत्वेन जश्त्वोपन्यासवैयर्थ्यात्तल्लेति नव्या आहुः॥ तन्न॥ नाशास्त्राणां पुणपत्सो सोन्याप्यस्पतेर
त्त्वात्॥ विश्वपावित्यदीर्घोच्चारिसिचेति स्वकर्तृकोपन्यासवत्॥ पदमपि प्रसाद कृतोक्तं॥ तदोवावसान इति चर्त्वे
कृते पश्चात् शिव + त्र + इत्यनेन संबंधे ततो जश्त्वचर्त्वे इति॥ इपितन। नुक्तरीत्या मध्ये शास्पानवबोधात्॥ जश्त्वे शि
वशब्दानपेक्षणाच्चा। छत्वममीति॥ सूत्रे अटीत्यपहाय अमीति पाठ्यमित्यर्थः॥ श्रोततीति॥ छत्वेनेति शेषः॥ श्रुतिरआ राम

४८

५

सेचनि॥ योपधपारेतु श्रुतिरक्षरणाइति॥ मोनुस्वारः॥ पदस्येत्यनुवृत्तं मइत्यनेन विशेष्यत इत्याह॥ मांतस्य प
दस्येति॥ हलीति॥ हलिसर्वेषामित्यतो हलीत्यनुवृत्तेः॥ गम्यत इति॥ अत्रानुस्वारो नेति शेषः॥ नश्चापदांतस्य॥ व
चनेन मइत्यनुकृष्यत इत्याह॥ नस्य मस्य चेति॥ यशांसीति॥ जश्शसोः शिरिति शी नपुंसकस्य झलच इति नुमि सांतम
हत इति दीर्घे कृते नस्यानुस्वारः॥ आक्रंस्यत इति॥ क्रमु पादविक्षेपे॥ आङ उद्गमने इति नङ्॥ स्यतासी लृलुटोरिति स्य
॥ लुङ्क्रमोरिति नियमादिड्विरहे मस्यानेनानुस्वारः॥ अपदांतस्य किं॥ राजन्यश्य॥ अनुस्वारस्य॥ अङित इति॥ अकप
देलक्षणाच्च॥ चौरादिकरांयतातत्क्तः॥ निष्ठायां सेटीति लोपः॥ अकेसत्रोपदेशे नकारस्य वापमिति तस्यानुस्वारेणेन प
रसवर्णः॥ आंतरतम्यान् ङकारः॥ अंचित इति॥ अंचेः पूजायामितीट्॥ नांचेः पूजायामिति नलोपनिषेधः॥ कुंठित इ
ति॥ कुठ प्रतिघाते॥ कुटिचेति पठितत्वात्॥ इदित्वान्नुम्॥ शान्त इति॥ शम उपशमे॥ वाहां [illegible] तस्यांते त्यौदिनानि
पातनादिदुसावेत्र अनुनासिकस्य किझलोः ङ्क्ति इति दीर्घे मोनोधातोरिति मस्य नकार इति केचित्॥ तन्न॥ पदांते नत्व
विधानात् तस्मान्मस्य नश्चापदांतेत्यनुस्वारेणेन परसवर्णो नकारः॥ गुम्फित इति॥ गुम्फ ग्रंथे॥ नोपत्यफांताद्वेति अ
कत्वपक्षे नलोपाभावः॥ मस्येति॥ मस्यग्रहणमनुस्वारनिवृत्त्यर्थमिति भावः॥ सम्राडिति॥ राजृ दीप्तौ॥ संपर्वोत्सत्स

द्विषेत्यादिना किं पित्रश्वमस्त्रेति षत्वे जश्त्वे न उः ॥ किमलल्लपतीति ॥ जल्लहल्लनमामिति मित्वपक्षे रोमिनां हृस्वः
५० ॥ समसंबंधी विधिरिति ॥ तेन समत्वाकृतजो वषुहन्नश्जग्रह इत्यत्रानुवाद्य ÷ छल + योरपि यथासंख्यं सिद्धं ॥ स
मकमेकविधानमिति व्याख्याने तन्न सिध्येदेति साधुः ॥ यथासंख्यमिति ॥ संख्याशब्देन क्रमो लक्ष्यते ॥ तेन यथाक्र
ममित्यर्थः ॥ ङ्णोः कुक्टुक्शरि ॥ कुक्टुकोः स्वरांतत्वात् प्राङ्क्शेत इत्यत्र षत्वं भवति ॥ पदांतादित्यनुवर्त्तते ङ:त्य
त्त्वात् ॥ एवं प्राङ्_कसाय इत्यत्र सात्पदाद्योरिति षत्वनिषेधः ॥ सुगणाट् सपि इत्यत्र षत्वनिषेधश्च सिध्यति ॥ पौ
ष्करसादिरिति ॥ पुष्करेत्तीये विशेषे सोऽरत्तीति स्वतस्त्र द्विषतिधिकृष्णु ॥ तस्यापत्यं पौष्करसादिः ॥ बाह्वादित्वादिञ्यनुयतिका
दित्वादुश्चपपरहृड्डिः ॥ एतज्ज्ञानादिन्याक्रोशपुत्रस्येति सञ्जोष्यपठितं ॥ ङः सिधुक् ॥ तस्मादित्युत्तरस्येति सीति सप्त
म्याः षष्ठी प्रकल्प्यत्ते परत्वादुभयनिर्देशे पंचमीनिर्देशो बलीयान् इति न्यायादित्याशयेनाह ॥ सस्येति ॥ लाघवार्थः स
प्तम्यर्हनिशः ॥ षट्संत इति ॥ चर्त्वस्यासिद्धत्वात् गत्यरत्वेन धुट् ॥ नस्य चर्त्वेन तकारः ॥ चयोद्वितीया इति तु न ॥ च
र्त्वस्यासिद्धत्वात् ॥ अत एव धुडभावे रूपद्वैधेन ॥ धुटः परादित्वं न पदांतादिति ष्टुत्वनिषेधार्थं ॥ अत एव प्रकरणा
वैरूप्यार्थं धकून्न कृतः व्याख्यानस्तु अत एव वक्ष्यमाणास्तगितिहैव न कृतः इत्याहुः ॥ तन्न ॥ चयोद्वितीया इत्यस्यापि पक्षे प्रसंगा राम

५०

६

त् ॥ प्रकाशाकृतस्तु एवमपि प्रक्रियालाघवार्थं तुङेव कर्त्तुमुचितमित्याहुस्तदसत् ॥ पक्षे यकोर प्रसंगात् ॥ इह टका
रनकारविगीर्णां द्वित्वे धकुड्से ष्टोतरभावेच ॥ संकलनपाणोः ङश ॥ परसवर्णस्यासिद्धत्वादुक्ष्यमाणरीत्यानुस्वारस्य
शत्वेन शरः खय इति तकारस्य द्वित्वे द्वात्रिंशत् ॥ अनचि चेति लक्षणांतरेण पुनर्द्वित्वे चतुःषष्ठिरूपाणि ॥ न च पूर्वत्रा
सिद्धीयमद्वित्व इति निषेधात् परसवर्णो नासिद्ध इति वाच्यं ॥ परसवर्णस्य द्वित्वाकरणात् ॥ अत एव स्वरितो वानुदा
इत्यत्र द्विर्वचने परसवर्णत्वसिद्धं वाच्यमित्यस्य संपन्नाः संवत्सर इति द्विर्वचनस्थास्युदाहृतं ॥ प्रत्यासत्त्या यस्य द्विरुक्ता
रणांतस्यासिद्धत्वे प्राप्ते तन्निषेधार्थं तदारंभात् ॥ विषयसप्तमीत्वेऽप्यांचिकत आसिसत इत्यादौ नंद्रा इति निषेधानापत्तिः ॥
अत एव द्विर्वचने कर्त्तव्य इति हरदत्तादयो व्याचख्युः ॥ एतेन सस्य शरः खय इति द्वित्वे द्वात्रिंशत् ॥ शरोचीति निषेधस्त
सौत्रद्वित्वविषयः ॥ वत्सरः अप्सरा इति भाष्योदाहृतेरिति मनोरमोक्तमपास्तं ॥ चर्त्वस्यासिद्धत्वेन खयः परत्वाभावात् ॥
न चैवं शरः खय इत्यस्याप्सराः क्षीरमिति भाष्योदाहरणानुपपत्तिः ॥ उणादीनामव्युत्पन्नत्वादित्यन्यथाऽप्सुजस्सतुरित्यादिकदा
हरेत् ॥ अत एव न पदांतेति सूत्रे किर्यो गिर्योरित्यत्र दीर्घनिवृत्त्यर्थं स्वरदीर्घयलोपेषु इत्युक्त्वा पुनर्दीर्घग्रहणेसो प्रसा
ख्याते किर्योरित्यादौ दीर्घमाशंक्य उणादयोऽव्युत्पन्नानि इति कैयटः संगच्छते ॥ अप्सरा इत्यत्र स्वरदोषाभिधायिनो रपु

१

५१

ढागमनिपातनात्॥ क्षीरमितितुनघस्मरूपंकिंतुस्फायितंचीत्यादिरक्प्रत्ययविधौपठितेनबहुलमन्यत्रापीत्यनेनरकिघ
सेःकिच्चेतिसूत्रेतुक्षीरंसर्पिर्मधूदकमित्यादावंतोदात्तत्वदर्शनेननव्युत्पन्नमितिभगवतस्तात्पर्यात्॥ नहिभाष्यकैयटाभ्याम
स्मराइत्यादिःसाधनिकादर्शिता॥ किंचपूर्वत्रासिद्धीयमद्विर्वचनइत्यस्यभाष्येसर्वस्यद्वेइतिसूत्रेद्रोग्धाद्रोग्धाद्रोढारइत्यादेर्हि
त्वसाजपंचोदाहृतत्वात्स्वरितोवानुदात्तइतिसूत्रेपदाधिकारश्चझत्वघत्वढत्वनत्वरूत्वादीनिसिद्धानीतिवचनेनता
दृशामेवपरिगणनानांनिमित्तांशेनतस्यवृत्तौमानाभावःस्पष्टएव॥ वस्तुतस्त्वंतरंगत्वाड्ढत्वादेःकृतेद्वीसापेक्षत्वेनबहि
रंगस्यसर्वस्यद्वेइत्यस्यप्रवृत्तौवैकल्पिकत्वधत्वादिपुरस्कारनिष्ठाप्रसक्तेःपूर्वत्रासिद्धीयमद्विर्वचनइतितत्समानार्थंलत्वप
त्वादिपरिगणनंचव्यर्थमित्युक्तंकैयटे॥ वचनांतरमप्येवं॥ स~~तिसिष्टसिद्धौपूर्वत्रासिद्धमित्य~~प्पतित्यादावनुस्वार
स्यपरसवर्णेनद्वित्वेपरसवर्णीयरूपसिद्धेः॥ एवंचषड्ढुंतत्इत्यत्रठानुस्वाररूपोर्द्वित्वेचर्त्वेपरसवर्णयोःसतोरिष्टसि
द्धौपूर्वत्रासिद्धमित्यस्योपन्यासोव्यर्थएवनव्यानां॥ तस्मात्सकारद्वित्वंतुचर्त्वेद्वित्वयोःपरद्रूपाश्रितत्वेनवहिरंगत्व
प्रवृत्तौपूर्वत्रासिद्धमितिचर्त्वमसिद्धमितिदुर्लक्ष्यमेव॥ वृत्तिकृतातुसर्वस्यद्वेइत्यस्यसर्वग्रहणसामर्थ्याद्द्रोग्धार
इत्यादिसिद्धिंमत्वापूर्वत्रासिद्धीयमितिनादृतमितिदिक्॥ शितुक्॥ नइतिपंचम्याःकृतार्थायाःशरीतिसप्तमीषष्ठी

राम

५१

१

प्रकल्पयतीत्याह॥ नस्येति॥ ननुमकृतोधकुदवानुवर्त्तितांकिंतुकेतिचेन्मैव॥ धुटःपरादित्वेनसत्संभूरित्यादौपदांता
झयइतिविधीयमानछत्वानापत्तेः॥ नचैवंकुर्वन्छेतइत्यत्रतुकःपूर्वांतत्वेननकारस्यपदांतत्वाभावात्पदांतस्येतिरा
त्वनिषेधोनप्राप्नोतीतिवाच्यं॥ कापिकालपक्षेतत्रणत्वेकर्त्तव्येपदद्वयाश्रितत्वेनतुकोवहिरंगतयासिद्धत्वेनपदांतत्वा
नपायात्॥ किंचभाष्येसोऽश्रुनेत्यत्रयोगविभागेनणत्वाभावउक्तः॥ तद्यथा॥ सोऽश्रुना॥ नभाभूपूइतिसूत्रान्नेत्यनुवर्त्ततेरा
इतिच॥ सोऽश्रुनापोगोणोनस्यात्॥ राकारार्थमिदं॥ संग्रहाहनवर्गग्रहणंचोत्तरार्थमित्येवकुर्वन्सीरतीत्यत्रपूर्वसूत्रेधुरः
परादित्वेननस्यपदांतत्वात्नत्वनिषेधःफलमितिप्राचीनग्रंथोपयोपद्देशपक्षाभिप्रायेणोपोत्यः॥ सञ्छंभुरिति॥ नचानु
क्रिसतिझलांजशोंतइतिसूत्रेजश्त्वोत्तरंचुत्वेजकारस्यश्नवशांकिंनस्यादितिवाच्यं॥ तुकोसिद्धत्वात्॥ अतश्चत्वोत्तरम
पिजश्त्वंनाशंक्यं॥ चतुष्टयमिति॥ एतत्त्वहृस्वपंडितकर्तृकपरचंद्रिकानुरोधेनोक्तं॥ संग्रहश्लोकोपितत्परएव॥ वस्तु
तस्तुसञ्छंभुरित्यत्रछत्वस्यासिद्धत्वाच्छपरत्वमाश्रित्यचपोद्वितीयाइतिपक्षेचस्यकारेछकारेछकारविशिष्टमेकंरू
पंतथाछत्वाभावपक्षेतेनैवपक्षेचकारस्यछत्वेकृतेछकारविशिष्टमपरं॥ + छ + मूलोक्तरूपतुष्टयेनसहसंकलनया
रूपषट्कमितितत्वं॥ ङमोह्रस्वात्॥ पदस्येति॥ पदस्येत्यधिकारात्॥ ननुपदस्येत्यस्यतस्मात्परस्येतिव्याख्यानमनु

८

५२ चितमिति चेन्न॥ ङम इति पंचम्यंतु विशेषणत्वात्। तदनुरोधेन विपरिणाम्यमानत्वात्॥ अत एवोभयनिर्देश इति न्यायेना
चीति सप्तम्याः षष्ठी प्रकल्प्यते तस्यैवागमो विधीयत इत्याह॥ अच इति॥ सप्तमीनिर्देशस्तु लाघवार्थ उत्तरार्थश्चेति भावः॥ ङमु
डागम इति॥ तथा च ङमः प्रत्याहारः संज्ञायां कृतं टित्त्वमानर्थक्यं तदङ्गवन्न्यायेन संतिषु विश्राम्यति॥ तेन ङुट् नुट् णुटोऽसंवंती
त्यर्थः॥ सुगण्णिति॥ गण संख्याने॥ णयंताद्धि च्॥ ननु क्विपु॥ अनुनासिकस्य क्वीति दीर्घप्रसंगात्॥ ङमुट्कृते णेरपि लोप
योर्न स्थानिवत्त्वं॥ पूर्वत्रासिद्धे न स्थानिवदिति निषेधेरित्याहुः॥ पदात्परस्येति किं॥ दंडिना॥ अचः किं॥ दंडिभ्रश्य॥ हे मपरे वा
मय उञो वो वेति विकल्पद्वयमध्यपाठादेव नित्यत्वसिद्धौ नित्यग्रहणं स्पष्टार्थमिति प्राञ्चः॥ नश्च शि तुगित्यनयोरपि नि
त्यत्वं स्यात्तन्मध्यपतितत्वाविशेषादिति नित्यग्रहणमिति स्वरसतोऽपि प्रापः॥ ननु परमदंडिना इत्यत्रातिव्याप्तिरंतर्व
र्त्तिसुपापरत्वादिति चेन्नैवं॥ उत्तरपदत्वे चापदादिविधौ प्रतिषेध इति प्रत्ययलक्षणप्रतिषेधात्॥ अत एव परमवा
चौ परमश्वलिहौ परमगोदुहाविति त्यादौ कुत्वढत्वघत्वादीनि न भवंति॥ न च ङमि च पद इत्यतः पद इत्यनुवर्त्यो ङारे
:परस्येति व्याख्यानान्नदोष इति वाच्यं॥ तत्रैव नलोपस्याह त्तपे ङुत्तणगतिरावश्यकत्वेऽनुहृत्याद्धि कुशावेपथ्यौ हित्या
हुः॥ ङमुटः परादित्वे फलं तु तु कुर्वन्नास इत्यत्र परांतस्येति णत्वनिषेधः॥ अत एव ङमो ह्रस्वादचि ङ इति न सूत्रितं॥ राम

५२

८

एवं स्पद्वित्वस्य परं णत्वं प्रत्ययसिद्धत्वाद्योगेन णत्वस्य दुर्वारत्वादितिदिक्॥ समः सुटि॥ मोनुस्वारेणैव सिद्धावनुना
सिकत्वार्थं सकारत्वार्थमिदमिति भावः॥ अत्रानुना॥ अयं विधिरधिकारो वेति पक्षद्वयं॥ अत्यंत्र ग्रहणं व्यर्थं तत्र रुवस्त
परस्मात्कार्यिणो विशेषणं तेनार्थः॥ परस्यानित्यं रुत्वं पूर्वस्य तु वानुनासिक इति॥ आद्यस्यार्थः॥ रु प्रकरणे गणेः पूर्वस्य
वानुनासिक इत्यपवर्गेण वाधकाभावात्॥ विधेयांतरानुपस्थित्वान्यत्र विकल्पशंकानुत्थानात्॥ तत्राद्यस्यैव लाघवात्॥ सकृ
द्विधिव्यापारमात्रेणाकांक्षाशांतेः॥ अधिकारपक्षे प्रतिसूत्रमावृत्त्यवश्यंभावेनातिगौरवं स्यादित्याशयेनाह॥ अत्र रु
प्रकरण इति॥ णोरिति॥ उपलक्षणमेतत्॥ तेन समो वा लोप इति पक्षेप्यनुनासिकः सिध्यतीति भावः॥ वाशब्दस्तु स्पष्टा
र्थः॥ अनुनासिकात्पर इति लिंगादेव तत्सिद्धेः॥ नह्यनुनासिकविकल्पं विना तदभावपक्षे इति संभवतीति प्राञ्चः॥ वस्तुतस्तु
वाग्रहणमावश्यकं॥ अन्यथानुनासिकादेव परत्वादनुस्वारः स्यात्॥ ल्यब्लोपे पंचमीत्वे मानाभावात्॥ न च पूर्वग्रहणं
व्यर्थं॥ पूर्वस्येत्येतन्निवर्त्तकतयाचरितार्थत्वादित्याशयेनाह॥ वेति॥ तथा चाव्यवहितपूर्वे वाचित्वं स्वारसिकं पूर्वशब्दस्य
न बाधितं तेन च क्रिंस्त्रापरवित्यत्र चकाराकारेणातिप्रसंग इति भावः॥ अनुनासिकात्॥ ल्यब्लोपे पंचमीयमित्याह॥ अनु
नासिकं विहायेति॥ अनुनासिकाभावपक्षे इत्यर्थः॥ आगम इति॥ परशब्देनैतल्लब्धमिति भावः॥ नचास्यापदांतास्यां पूर्वौतु

५२

वाभ्यामेजित्यत्र एवं शब्दे न यथा॥ विसर्जनीयस्य सः॥ खरीति॥ खरवसानयोरित्यतो मंडूकप्लुत्या खरीत्यनुवृत्तेः॥ नन्वनु-
स्वारस्यापठितत्वात्ततः परस्य द्वित्वं न स्यादित्याशंक्याह॥ अनुस्वारविसर्गेत्यादि॥ अकारोपरीति॥ इकारात् प्रागिति शेषः॥
अन्यथा ययः सुइस्याशाविशानुत्तरस्य षत्वं स्यादिति भावः॥ न च रामइत्यादौ विसर्गस्याणोप्रग्र. ह्यस्येत्यनुनासिकप्रसं-
गः॥ तस्य स्थानप्रयत्नाभ्यामंतरतमे चरितार्थत्वात्स्थानसाम्यमात्राद्यङःकारापादनायोगात्॥ तर्ह्यनुस्वारस्यैव द्वित्वं न
स्यादच्त्वाभावादित्याशंक्याह॥ शर्षु चेति॥ तकारादित्व इति॥ अचोरहाभ्यां द्वे इत्यनेनेत्यर्थः॥ वचनांतरेणेति॥ यणोम-
यो द्वे वाच्ये इत्यनेनेत्यर्थः॥ पुमः खयि॥ पुंस इत्यस्य संयोगांतलोपेवशिष्टभागस्यानुकरणं पुम इति तस्यैव कार्यित्वा-
दिति भावः॥ अम्पर इति बहुव्रीहिः परग्रहणसामर्थ्यात्तदाह॥ अम्परे खयीति॥ अप्रत्यय इति॥ उदुपधस्य चाप्र-
त्ययस्येत्यत्रेति शेषः॥ ख्याञादेश इति॥ चक्षिङः ख्याञित्यत्र ख्शाञादिरादेशो विधीयत इति ख्शाञः शस्य यो वेति शा-
त्वप्रकरणांतरे क्रियते॥ खयपरत्वे कर्त्तव्ये पूर्वस्यासिद्धत्वादुम्परस्य खयः परत्वाभावात् सिद्धार्थकथनन्तु परमे-
न दित्यर्थः॥ न च वर्जने प्रतिषेधः असनयोश्चेति प्रतिषेधात्कथमत्रादेश इति वाच्यं॥ बाहुलकात्॥ तथा चेहैव सू-
त्रे वार्त्तिकं बहुलं संज्ञाछंदसोरिति॥ विस्तरस्तु निङने वक्ष्यत इति दिक्॥ चक्षिङ्स्यायस्त्वेति॥ त्रैङ् पालने ङित्वादात्मनेप राम

५२

२

दं॥ प्राचा तु त्राहीत्युक्तं तत्र त्रापत इति त्राः त्राइवाचरेति आचारक्विवंताल्लोडुवोधा इति समाधेयमित्याहुः॥ नॄन्पे॥ उभ-
यथर्क्षु इत्यतः उभयथेत्यनुवृत्त्या विकल्पः फलतीत्याह॥ रुः स्यादिति॥ यइत्यकारो न विवक्षित इत्याह॥ यकार इति॥ वर्णा-
त्कार इत्युक्तेरिति भावः॥ तेन नॄः पुनातीत्यादि सिद्धं॥ कुप्वोः॥ ओसः परस्य रुत्वे तस्य खरपरत्वाद्विसर्गः॥ जिह्वामूली-
यस्य शर्षूपसंख्यातत्वेन खत्वात्॥ खर्परे शरीति पाक्षिको विसर्गः॥ वा शरीति पक्षे विसर्गः तदभावे सत्वं॥ उहादेश-
योः कपावुच्चारणार्थौ न तु विधेयकोटिप्रविष्टाविति बोध्यं॥ चकारेण विसर्गोनुकृष्यत इत्याह॥ चाद्विसर्ग इति॥ यत्तु प्राचा
वाद्विकल्प इत्युक्तं तदसत्॥ वा शरीत्यतो वेत्यनुवृत्त्यैवोपपत्तौ चग्रहणवैयर्थ्यापत्तेः॥ ≍क≍पाभ्यां मुक्ते सत्वापत्तेश्च
॥पक्षे॥ चानुकृष्टविसर्गस्य कःपाभ्यां समावेशो विकल्पं विना न साध्यत इत्यभिप्रेत्य तथोक्तमिति॥ अथवा विविधं क-
ल्प्यत इति व्युत्पत्त्या विकल्पशब्देन विसर्गोस वोच्यते॥ तथा च शिक्षायां ओभावश्च विवृत्तिश्च शषसा रेफ एव च॥ जिह्वाम-
लमुपध्मा च गतिरष्टविधोष्मण इत्युक्तं॥ ऊष्मण इति विसर्गस्याष्टविधा गतिरित्यर्थः॥ कानाम्रेडिते॥ कानिति द्वितीयां-
तानुकरणात् षष्ठ्यर्थे प्रथमेति प्रांचः॥ वस्तुतस्तु षष्ठ्याः सुपां सुलुगित्येव सुवचं॥ सौत्रत्वकल्पनाया उभयोस्तुल्यत्वा-
त्॥ न च द्वितीयांतत्वे प्रातिपदिकत्वविरहात्कथं प्रथमेति वाच्यं॥ अनुकार्यस्य द्वितीयांतत्वेप्यनुकरणस्यातथा-

१०

५४ त्वात्॥ न चैवमपि नलोपादुर्वीरइति वाच्यं॥ तस्मिन्कर्त्तव्ये प्रकृतिवदनुकरणमित्यतिदेशेन प्रत्ययांतत्वेन प्राति
पदिकसंज्ञाविरहात् अतिदेशानित्यत्वाद्विभक्तौ क्रियमाणायामप्रवृत्तिः॥ एतत्तदैतेस्य इति निर्देशाद्वानित्यत्वे मानमि
तिदिक्॥ एतेन नन्दन्त्य इति व्याख्यातं॥ कान्कानिति वाच्ये आम्रेडितग्रहणं यत्र द्विरुक्तिस्तत्रैव यथा स्यादिह मा भूत् कान्का
न्पश्यसि॥ कान्कुत्सितान्पश्यसीत्यर्थः॥ कस्कादिषु च॥ सोपदादावित्यतः स इति इणः ष इति सूत्रं चानुवर्त्तते विसर्ज
नीयस्येति + इहैव कः किंशब्दः प्रश्ने परः क्षेपे + चस्य वीप्सितेफलितमाह॥ इणः उत्तरस्येति॥ प्रक्रियायां तु ᳵक ᳵपौ नेत्युक्तेत
त्फलितार्थकथनपरं न त्वाक्षरिकोऽर्थः॥ ᳵकᳵपयोरस्वरितत्वान्न मोऽप्रकृतत्वाच्चेति॥ कास्कानिति॥ नित्यवीप्सयोरिति
द्वित्वं॥ एवं च संपुंकानामित्यत्र कान्शब्दो न पठनीय इति भावः॥ कस्क इति॥ कः कोत्र भोः इति नाटकप्रयोगस्तु संहि
ताविवक्षाविरहान्निर्बोध्यः॥ संहिताधिकारे कस्कादिषु चेत्यस्य पाठात्॥ कौतस्कुत इति॥ तत आगत इत्यण्॥ अ
तुस्य च निपातनाद्ध्रस्य यात्वम्॥ सर्पिष्कुण्डिकेति॥ इह यद्यपि नित्यं समास इत्येव सिद्धं तथाप्युत्तरपदस्थत्वेपि यथा
र्थं परमसर्पिष्कुण्डिकेति पारायणिकमतत्वेन वृत्तिकृतोक्तं॥ तच्चाप्यविरुद्धं॥ तथा समासे व्यपेक्षाविरहेपि षत्वार्थं
पाठ इति मूले ह्रस्वस्यपि॥ छे च॥ छकारे ऽकार उच्चारणार्थः॥ आङ्माङोः॥ आङ्साहचर्यान्माङप्यव्ययमेव गृह्यतेति तेन प्र राम
५४

१०

माच्छदइत्यत्र नानेन नित्यस्तुक् किंतु पदांताद्वेति विकल्प एव तत्र माङः ङित्पु अत एव धातोर्ङित्वापरावतस्याङित्वाल
तुगित्यपास्तं॥ आच्छादयतीति॥ छद आपवारणे णिच्युपधावृद्धिः॥ माच्छिददिति॥ छिदिर् द्वैधीकरणे॥ माङि लुङ्॥ न मा
ङ्योगइत्यडभावः॥ इरितो वेति च्लेरङ्॥ दीर्घात्॥ दीर्घमतीतीति दीर्घात्तुक् दीर्घीयवस्तुकमित्यर्थः॥ इत्याशयेनाह॥
दीर्घाच्छे पर इति॥ दीर्घादिति प्रथमांततुगित्यनेन समानाधिकरणमिति भावः॥ ननूक्तव्याख्यायां मानाभावात्तु पंच
म्यंतमेवास्तु तथा च तस्मादित्युत्तरस्येत्यनया षष्ठ्येवत्तुग्विधीयतामित्याशंक्याह॥ सुराच्छायेति॥ अत्र हि षष्ठ्यस्तु किं स
तिखरि चेति चर्त्वे च छ परं श्रयेत सन्निपातपरिभाषाप्रवृत्त्या चर्त्वे नेति चेच्छकारो परि चकारः श्रयेत॥ न चेदं ज्ञापकमनुपप
त्तेः॥ अपदांतविषयत्वादेतस्य सूत्रस्य पदान्ते तूत्तरेण विकल्पेन भाव्यमिति चेत्सत्यं॥ पदांताद्वेत्यत्र दीर्घादित्यनुवर्त्तते
तथा च तेनैव षष्ठ्यस्य पाक्षिके तुकि उक्तदोषस्य तदवस्थत्वे सुराच्छायेति निर्देशानुपपत्तेरुत्तरसूत्रे दीर्घस्यैव तुगिति
निर्णीये सतीहापि तथैवोचितमित्यस्य विप्रायेणात्र तदुपन्यासो न दोषायेति भावः॥ अपदांतार्थमिदमित्युक्तत्वे वो
द्राहरति॥ चेच्छिद्यत इति॥ धातोरेकाचो हलादेरिति यङ्॥ सन्यङोरिति द्वित्वे हलादिशेषे गुणो यङ्लुकोरित्यभ्यास
गुणो सनाद्यंता धातव इति धातुत्वे ऽनुदात्तङित आत्मनेपदं॥ पदांताद्वा॥ पदमतीत्यादि पर्वं वरेवेति सिद्धमिष्टं॥ ॥ ॥ इ

११

५५ तिश्रीतिरुमलभट्टसूनुरामकृष्णभट्टकृते सिद्धांतरत्नाकरे हल्संधिः॥ ॥ ॥ विसर्जनीयस्य सः॥ प्रकरणानु
रोधेन प्राग्व्याख्यातमपि स्मारितं॥ शर्परे॥ कःपयोः सत्वस्यायमपवादः॥ शर्परे इति॥ बहुव्रीहिः न तु कर्मधारयः॥ पर
ग्रहणवैयर्थ्यापत्तेः॥ खरीति वान्यपदार्थस्तदाह॥ शर्परे खरीति॥ विसर्जनीयस्य विसर्गविधौ फलाभावादितरथावृत्ति
रेव फलमित्याशयेनाह॥ न त्वन्यदिति॥ एतदेव स्पष्टयति॥ इहेति॥ न चैवं शर्परे इत्येनैवोच्यतां किं विसर्गग्रहणेनेति वाच्यं॥
अनंतरस्येति न्यायान्मध्येऽपवादन्यायाद्वा सत्वस्यैव निषेधापत्तावद्भिः सातं वासः क्षौममित्यादौ कःपयोर्दुर्वारत्वात्॥ न
चाद्भिः सातमित्यत्रेदुदुपधस्येति षत्वं किं न स्यादिति वाच्यं॥ अप्रत्ययस्येति पर्युदासे सामानाधिकरण्यपक्षं दूषयित्वा वै
यधिकरण्यपक्षस्यैव स्थापयिष्यमाणत्वात्॥ ननु परग्रहणं व्यर्थं न च तदभावे केवलस्य शर एव निमित्तत्वं किं न स्यादि
ति वाच्यं॥ खरीत्यनुवृत्तेरावश्यकतया शर्परस्य खर एव निमित्तत्वावश्यंभावात्॥ केवले शरि विकल्पस्य वक्ष्यमाण
त्वादिति चेन्न॥ खर्परे शरीति वैपरीत्यस्याप्यापत्तेः॥ एवं च पुरुषः त्सरुरित्यत्रातिव्याप्तिरिति परग्रहणं॥ वस्तुतस्तु वि
सर्जनीयस्य स इत्यत्र खरीत्यस्य साक्षान्निमित्तत्वस्य लक्षणपात्रापि तद्बाधे प्रमाणाभावाच्छरीत्यस्यैव तद्विशेषणा
त्वलाभेनोक्तातिप्रसंगाभावात् परग्रहणस्य स्पष्टार्थमेवेति दिक्॥ कुप्वोः॥ एवं सूत्रलेखनं प्रासंगिकमिति भावः॥ सोप राम

५५

११

दादौ॥ अपदादाविति कुप्वोरित्यस्य विशेषणं तद्धि सप्तमीविपरिणामेन व्याचष्टे॥ अपदाद्योरिति॥ सूत्रे त्वस्य पैनै
कवचनं॥ यदि तु खर्विशेष्यते अपदादौ खरीति तदा एकवचनं साधु॥ किंतु खरीति मंडूकप्लुतिराश्रयणीयेति क्लेशः॥ खरं
विना विसर्गालाभादुत्तरत्रापि तदनुवृत्तेर्नैष्फल्याच्चेति न व्याप्तिः॥ वस्तुतस्तु प्रत्येकाभिप्रायेणासौत्रमेकवचनं साध्वेवेति व्यत्ययादिवरी
नेमुधैवेति तत्वं॥ अत एव तदस्मिन्नध्यापयल्लाभशुल्कोपदादीपतेकर्मिणोरिमंथतयोश्च्यावर्तिचरोरित्यत्र मूलमनोरमयोः प्र
त्येकमेकवचनमिति स्वयं वक्ष्यमाणं संगच्छते॥ मंडूकप्लुतिः शर्परे इत्यादौ त्वयाप्याश्रितत्वान्न किंचिदेतत्॥ पाशकल्पककाम्ये
ष्विति वृत्तावुक्तं तत्सर्वं प्रदर्शनार्थं न परिगणनार्थमन्यस्यासंभवादिति न व्याप्तिः॥ पयः पिबतीति पयस्पा इत्यत्र तद्धितस्या
पि सत्वात्॥ गतिकारकेति सुबुत्पत्तेः प्रागेव समास इति सिद्धांतादत उदाहरणांतरमाह॥ पयस्पाशमित्यादि॥ न चातः
कमीति गतार्थताशंका॥ तत्रास्यानुपादानात्॥ समास इत्यस्यानुवृत्तेश्चेति भावः॥ प्रातःकल्पमिति॥ ईषदसमाप्ताविति कल्प
प्प्रत्ययः॥ अधिकरणशक्तिप्रधानस्यापि प्रातःशब्दस्य वृत्तिविषये शक्तिमत्परत्वं न विरुध्यते॥ दोषाभूतमहः दिवाभूता रा
त्रिरितिवदिति भावः॥ गीः काम्यतीति॥ काम्यपरोरेवेत्येतदिदिणः षइत्यत्राप्यनुवर्तते तेन षत्वमपि न॥ यद्युत्तरत्रैवैतत्पठ्यते त
र्हि सत्वप्रसंग इति अत्रैवेदं पठित्वा उत्तरसूत्रानुवृत्तिरिंगितेति भावः॥ इणः षः॥ सत्वापवादः॥ इदं सूत्रं स इति वद्युपम

१२

५६ पुत्तरसूत्रेष्वनुवर्त्तेत तथा वैरा उत्तरस्य विसर्गस्य षत्वमन्यस्य तु सत्वमिति विवेको दुष्करः॥ नमस्पुरसो॥ इत उत्तरमप
दाद्वाविति न संबध्यते व्याख्यानात्॥ पुरः प्रष्ठव्याः इति॥ पुर इत्यस्य जसंततां स्फुरयितुं रः पुरा विसर्गस्योपादानमिति भावः
॥ एपालनपायापोः भ्राजभासेत्यादिना क्विप्॥ उरोष्प्ररूर्वस्य स्फुरस्फुरत्वोः॥ इदुदुपधा॥ इदुतावुपधे यस्य समुदायस्य तस्या
वयवो यो विसर्जनीय इति वैयधिकरण्येन संबंध इति न्यासः॥ यत्तु न तु संभवति सामानाधिकरण्येनान्यपदार्थत्वे संभव
त्यनुपस्थितसमुदायस्य तत्~~स्थविसर्जनी~~यीति सामानाधिकरण्ये त्वेन कल्पना प्रोगात॥ तल्लक्ष्यबाधकाभावाच्च॥ इदमेव चेदुदुपध
ग्रहणमेकदेशानुमतिद्वारा प्रयोगवाहानां वर्णसमाम्नायपाठे ज्ञापकं बोध्यं॥ अकारो यनिशषु चेत्यं शास्तु प्रयोजनानुरोधे
न व्याख्यानबलल्लक्ष्य इत्युत्पन्यदेन तु॥ अप्रत्ययस्य यो विसर्ग इति वैयधिकरण्येन संबंधः प्रत्ययभिन्नस्यावयव इति यावत्
॥ एतच्च प्राचीनरीतिमनुसृत्योक्तं वस्तुतस्तु प्रसक्तस्य प्रतिषेधस्य वायं इत्यनुपदमेव वक्ष्यामः॥ तेन नाभिः क्रोशानुमसनेपा
भिः पुरामनव इत्यादौ न षत्वं॥ न च सामानाधिकरण्येपि षष्ठ्यादृसत्वान्नोक्तदोषः॥ तस्यागतिकगतेः॥ किंच हरिभिः करोतीत्या
दौ लोकेपि षत्वं न॥ अत एव वेस्तोसोः सामर्थ्ये इत्यत्र तिष्ठतु सर्पिः पिबत्वमुदकमित्युदाहरणो विसर्गः संगच्छते॥ अन्यथा
वैकल्पिकषत्वाप्रवृत्तावपि नित्यषत्वस्यानेन दुर्वारतया सो संगतः स्यात्॥ पहुं रथाविमिष्यतादिति प्रयोगास्तु छान्दसत्वा राम

५६

१२

त्॥ स्यादेतत्॥ यदि वैयधिकरण्यमानं स्यात्तर्हि एवं न वक्ष्यामः॥ संभवतीत्यादिन्यायबाधाप
त्तिश्च॥ सामानाधिकरण्यपक्षस्तु भाष्यारूढस्तथा हि॥ इहैव सूत्रे पुम्मुहुसोः प्रतिषेध इति वार्त्तिकं तद्भाष्यं च त्वन्मते ऽसंगतं॥ पु
सो विसर्गस्याप्रत्ययसंबंधित्वेन षत्वाप्राप्तेः॥ किंच कस्कादिषु भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात्षत्वप्रति
षेधस्येति भाष्योक्तं ज्ञापकमपि त्वन्मते ऽसंगतं॥ मातुः करोतीत्यादावेकादेशस्य पराद्दित्वेन ग्रहणात्प्रत्ययसंबंधित्वेन विसर्ग
स्य षत्वाप्राप्तेश्चाप्यत्रूरस्तारप्रर इति सूत्रे कैयटो वावचीति॥ लुप्यते ऽप्रत्यय इति भाष्यमुपादाय सकारसन्निधिकाले अकारे यानि
वलव्धा प्रत्ययसंज्ञासमुदायसंनिवेशिना वा न स्यादिति कुतस्तदादेस्तशब्दे स्यन्ते उत्वे च कृते ऽवशिष्टः सकार एव प्रत्ययसंज्ञः
स खलु प्र इति भाव इति तच्चिंत्यं॥ सकारसन्निधिकाले अकारस्याप्रत्ययत्वेपि तस्मिन्नलुप्ते ऽवशिष्टस्याप्रत्ययत्वान्न यायात्॥ न
चाप्रत्ययरूपाकारस्यैकादेशे कृते लुप्तेपि सकारैकदेशत्वस्य प्रत्ययत्वे स्यैकदेशविकृतन्यायेन प्रत्ययत्वान्न यायात्॥ अन्यथा या
त्येपि कृतान्तक्लिप्यातिरित्यपि न स्यात्॥ पापायत इति स्थिते तालोपयलोपे ऽलोपस्य स्थानिवद्भावादातो लोप इति चेत्या लो
पयलोपः॥ किंच पापावर इत्यत्र यश्चप्रय इति वरचि अल्लोपयलोपयोः कृतयोरल्लोपस्य स्थानिवद्भावेनातो लोपे प्राप्तेन
न्निषेधार्थं क्विपमारोत यदीति सूत्रे वरे ग्रहणमनर्थकमापद्येत॥ तत्रापि यकारसन्निधिकाले अकारस्याप्रत्ययत्वेन तदा

१३

नीलुप्तस्यस्थानिवद्भावेनापिप्रत्ययत्वाभावेनातोलोपप्राप्तिर्हीरापारात्वात्॥तस्मादेकादेशस्यपरादिवत्त्वेनग्रहणादु
५९ रसुइत्यस्यप्रत्ययत्वंदुर्वारं॥नचरेफस्यपूर्वाभक्तत्वेनउइत्यस्यैवप्रत्ययत्वंनरेफविशिष्टस्येतिवाच्यं॥आद्यंतौटकितावि
त्यतोनशब्दानुवृत्तिमुररारर परइत्यत्रांगीकृत्यपूर्वांतत्वस्यैवभाष्यकृतास्थापितत्वात्॥अन्यथावध्वत्तउत्यजत्यहलादिः
शेषोनस्यात्॥गोःपुरित्यत्रवीरुपधायाइतिदीर्घोनस्यात्॥तस्माद्भाष्यादिसंमतत्वान्मनोरमोक्तमेवमनोरममितिचेत्॥
अत्रोच्यते॥किंसामानाधिकरण्यपक्षोभाष्यारूढइतिवदंतस्तववाचनिकोर्थोभिप्रेतउतन्यायसिद्धइति॥नाद्यः॥तादृ
ग्वचनस्यभाष्येऽदर्शनात्॥नद्वितीयः॥उक्तलक्ष्यविरोधेधत्वावसहकृतस्यापिन्यायस्यबाधात्वात्॥अन्यथाप्रसज्यप्र
तिषेधोच्छेदापत्तेः॥नचपुंसःप्रतिषेधइतिभाष्यविरोधःशंक्यः॥ + स्य + अव्यक्तपनिपक्षेतदभावान्॥पक्षांतरेत्वापि
कप्रतिषेधानुवादोनत्वपूर्ववचनं॥कस्कादिषुभ्रातुष्पुत्रग्रहणमप्रत्ययस्येतिनिषेधेप्राप्तेविध्यर्थं॥भाष्यंतुकाकु
न्यायेनयोज्यंकिंकस्कादिषुभ्रातुष्पुत्रग्रहणंज्ञापकंनज्ञापकंकिंतर्हिविध्यर्थमित्यर्थः॥अथवाभ्रातुष्पुत्रग्रहणंवै
य्यधिकरण्यसंबंधमेवज्ञापयति॥ननुषत्वप्रतिषेधंपतस्तत्रस्वार्थहानिरश्रुतकल्पनाप्राप्तबाधश्चेतित्रिदोषापरि
संख्याप्रसज्यते॥तथाचकस्कादिषुभ्रातुष्पुत्रग्रहणंज्ञापकमेकादेशनिमित्तात्षत्वप्रतिषेधस्येत्यत्रप्रतिषेधशब्द राम ५९

१३

एवंव्याख्येयः॥प्रतिषेधस्येत्यत्रषष्ठ्यर्थेप्रत्ययोऽपत्वं॥सौत्रप्रतिषेधोर्थीन्मातुःकरोतीत्यादौसवतिनतुज्ञापितः॥स्वतंत्रइत्यर्थः॥
पयष्यप्रत्ययस्येतिपर्युदासोलाघवान्नथापिफलसाम्यान्नयोक्तमित्यदोषः॥अतएवनित्यंसमासइत्यत्रपरमसर्पिःकुंडिकेति
भाष्योदाहृतंसंगच्छते॥यत्तुहरिभिःकृतमित्यादौषत्ववारणायसुब्भिन्नसंबंधकपदुधसाहचर्यात्सुब्भिन्नेइदुपधविसर्गस्यषत्व
विधानान्नातिव्याप्तिरितिकश्चिदवोचत्॥तन्न॥सख्युःपत्युःकरोतीत्यादावुदुपधस्यापिसुब्संबंधिनःसत्वादिष्टापत्तावुक्तभा
ष्यप्रयोगविरोधादिसुसोःसामर्थ्यइतिमूलोदाहृततिष्ठतुसर्पिःपिबत्वमुदकमितिप्रत्युदाहरणविरोधाच्चेति॥तस्माद्भाष्यविरो
धाभावाल्लक्ष्येबाधकाभावाच्चवैय्यधिकरण्यपक्षएववरमगरीयइतिदिक्॥अग्निःकरोतीति॥व्यपदेशिवद्भावेनप्रत्ययसं
बंधित्वंप्रत्ययत्वंचस्थानिवद्भावेन॥नचतस्मिन्कर्त्तव्येविसर्गस्यत्रैपादिकेनासिद्धत्वा॥अस्यत्ययस्येत्यत्रनैवस्थानिवत्सू
त्रंप्रतित्रैपादिकंनासिद्धमितिज्ञापनात्॥प्रत्ययःपरश्चेतिनिर्देशोपीहज्ञापकः॥अन्यथापदांतत्वाभावाद्विसर्गोनस्यात्॥
विशेषापेक्षमिदंज्ञापकं॥तेनाचःपरस्मिन्नितित्रिपाद्यांनप्रवर्त्तते॥अतएवपूर्वत्रासिद्धेनस्थानिवदितिनापूर्ववचनं॥
ननुस्थानिवद्भावेनासुप्रत्ययत्वंस्वाश्रितमप्रत्ययत्वमप्यस्ति॥नह्यतिदेशेनस्वाश्रितधर्मानिवर्त्यंते॥ब्राह्मणवत्क्षत्रिये
वर्त्तितव्यमित्यनेनब्राह्मणधर्माःक्षत्रियेऽतिदिश्यंते॥नतुतन्निष्ठानिवर्त्यंते॥तथाचोक्तोदाहरणेष्वेवंदुर्वारं॥अप्रत्यय

२४

५८

स्येति पर्युदासस्य उपयुक्तत्वात्॥ मैवं॥ उक्तपर्युदासादेव स्वाश्रितप्रत्ययत्वप्रयुक्तषत्ववारणात्॥ वस्तुतस्तु प्रसज्यप्रतिषे
धस्यैवायं॥ अतएव षत्वनिषेधरूपशास्त्रीयकार्ये कर्तव्ये स्थानिवत्त्वमपि सुलभं॥ पर्युदासे तस्याशास्त्रीयत्वात् स्थानिवत्त्वं दु
र्लभमेव स्यात्॥ मातुरिति॥ अत्र हि कृत उ इत्येकादेशशास्त्रं विसर्गं प्रति परंपरया प्रयोजकं॥ एकादेशनिमित्तादिति भाष्यपाठे
तु एकादेशशास्त्रं निमित्तं यस्योकारस्य तस्मात्परस्य विसर्गस्येति व्याख्येयं॥ मुहुः कामेति॥ अत्र कुप्वोरिति प्रवर्तत एव॥ ति
रसः॥ इह गतिरिति नानुवर्तते॥ पराभावेपि तिरस्कार इति प्रयोगदर्शनात्॥ अंतर्द्धावेव तिरसो गतिसंज्ञकत्वात्॥ द्विः त्रिः॥
ननु कृत्वोर्थग्रहणं व्यर्थं द्वित्रिशब्दाभ्यां सुजंताभ्यां साहचर्येण चतुःशब्दस्यापि तादृशस्यैव ग्रहणादिति चेत्सत्यं॥ साह
चर्यमनित्यमिति ज्ञापनार्थत्वात्॥ एतत्फलं तु दीधीवेवीटामित्यत्र भौवादिकस्येटधातोर्ग्रहणमिति प्राचः॥ यद्यप्यसति कृत्वो
र्थग्रहणे संख्योपसर्जनयोरतिव्याप्तिस्तथापि गौणमुख्यन्यायेन नसेतिति बोध्यं॥ आद्ययोरप्राप्ते चतुःशब्दस्य इदु
पधस्येति नित्यप्राप्ते इसुसपत्र विभाषेयमिति केचित्॥ अव्युत्पत्तिपक्षे रोहं॥ कृत्वोर्थयोर्विसर्ग इत्युक्ते चतुःशब्द इति व्याप्ति
ःस्यादत आह॥ कृत्वोर्थे वर्तमानानामिति ~~केचित्॥ अव्युत्पत्तिपक्षे रोहं~~॥ चतुष्कपाल इति॥ चतुर्षु कपालेषु संस्कृत इति तद्धि
तार्थ इति समासे संस्कृतं भक्षा इत्यणो द्विगोर्लुगनपत्ये इति लुक्॥ अव्युत्पत्तिपक्षे इदुदुपधस्येति षः॥ नन्विह सर्पिष्कुंडिकेत्यु

राम

५८

२४

दाहरणमयुक्तं कस्कादिषु पाठादेव सिद्धेरित्याशंक्याह॥ कस्कादिष्वित्यादि॥ अपेक्षाविरहे पीति॥ तिष्ठतु सर्पिष्कुंडि
कां परस्येत्यत्रेत्यर्थः॥ तथा च इसुसोरिति विकल्पापवाद इति भावः॥ अपेक्षाविरहेपीति तावन्मात्रोक्तौ समासेपि तत्त्वात्त
द्व्यावृत्तयेत्र समास इति विशेषणमिति द्रष्टव्यं॥ वस्तुतस्तु समासेपि तेनैव सिद्धत्वान्नेदमुदाहरणं युक्तं॥ अतो हविष्कुंडि
केत्याद्युदाहार्यं॥ अत्रेदमवधेयं॥ परमसर्पिष्कुंडिकेत्यत्र कस्कादिषत्वमपि न॥ भाष्यकारैरेतदर्थेव प्रत्युदाहृतत्वात्॥ नचै
वमनुत्तरपदस्थग्रहणं व्यर्थं परमहविष्कुंडिकेत्याद्यर्थं तदावश्यकत्वात्॥ अपःसहितेति॥ अपसो विकार इति तु नोक्तं
जानपदेत्यादिना ङीषप्रसंगादित्याहुः॥ अपस्करा इति॥ अप इव करौ यस्याः॥ नासिकोदरौष्ठजंघेति ङीष्॥ अधः॥ सू
त्रे षष्ठ्याः स्थाने व्यत्ययेन प्रथमेत्याशयेनाचष्टे॥ एतयोरिति॥ अधस्पदमिति॥ मयूरव्यंसकादित्वात्समासः॥ शिरस्प
दमिति॥ षष्ठीसमासः॥ सोत्र क्रममनुरुध्य पुनराह॥ कस्कादीति॥ ॥ इति श्रीमद्रामकृष्णभट्टविरचिते सिद्धांतरत्नाक
रे विसर्गसंधिः पूर्णतामगात्॥ ससजुषोरुः॥ पदस्येति वर्तते॥ तच्च सजुष्यं विशेष्यते॥ तत्र सकारे एतदंतविधौ सांतप
दस्य रुः स्यादित्युक्ते योंत्यस्येत्यंत्यस्यैव भवतीत्याशयेनाह॥ पदांतस्य सकारस्येति॥ सजुष्शब्दस्येति॥ अत्र प्रकाशकृ
तः॥ एतावता प्रातिपदिकेन तदंतविधिर्नास्तीति तदंतविधेः प्रतिषेधात्सजुःशब्दो यत्पदमित्यभेदेनैवान्वयो नतु

१५

५९

सञ्ज्ञः शब्दांतस्य पदस्येत्याहु ॥ अपरे त्वाहुः ॥ ग्रहणवतेत्यस्य प्रत्ययविषयत्वात्प्रकृततदंतविधेर्निर्बाधत्वात्सञ्ज्ञः शब्दा
न्तस्य पदस्येत्यस्यार्थस्तेन परमसञ्ज्ञस्यामिति निर्बाधं ॥ नचैवं स + विधि + ज्ञू रित्यत्र रूर्नस्यादिति वाच्यं ॥ व्यपदेशिवद्भावेन तस्या
प्युपपत्तेः ॥ नच व्यपदेशिवद्भावोऽप्रातिपदिकेनेति तन्निषेधः शंक्यः ॥ तस्य ग्रहणवतेत्यस्य च दिव उत्सूत्रे प्रत्ययविधिविष
यत्वस्य कैयटहरदत्ताभ्यामुक्तत्वादिति मन्याः ॥ तत्र कैयटग्रहणमयुक्तं ॥ तेन तथा तत्रानुक्तेः ॥ स्पष्टं चैतद्द समासे निष्कादि
भ्य इति सूत्रे भाष्ये ॥ पूर्वादिनिरित्येव सिद्धे सपूर्वाच्चेति सूत्रं ग्रहणवतेत्यस्य ज्ञापकं ॥ योगविभागास्तु व्यपदेशिवद्भावो
ऽप्रातिपदिकेनेत्यस्य ज्ञापकस्य च विशेषापेषापेक्षत्वादुसपंप्रत्ययविधिमात्रविषयमिति तत्रैव कैयटेन प्रपंचितं ॥
सर्वं च समासप्रत्ययविधावित्यत्र प्रत्ययविधिग्रहणं तदपवादस्थं नमुगिद्वर्णग्रहणवर्जमिति चोक्तं ग्रहणवतेत्यनेन
तुल्यार्थकं ॥ तत्रान्यतरछ्कयमकानुमितितत्वं ॥ यत्तु गोस्त्रियोरिति सूत्रे गोकुलमित्यत्र ह्रस्वत्वमाशंक्य व्यपदेशिवद्भावोऽप्रातिपदि
केनेति प्रतिषेधात् गोन्तत्वाभावान्न ह्रस्वत्वमित्युक्तं भाष्ये ॥ घुमिः सम्हरित्यसिद्धेस्तत्प्रौढिवादमात्रं ॥ वस्तुतस्तु पदांगाधिकार इत्य
नेनाज्ञापितस्तदंतविधिः ॥ नचैवं तत्र पदग्रहणेनोत्तरपदाधिकारेण गतार्थत इति कैयटोक्तं विरुध्यत इति वाच्यं ॥ पकेष्टकचितमिति
भाष्योदाहरणाभिप्रायेणेत्युक्तत्वात् ॥ तस्यासंकोचकत्वात् ॥ अन्यथेष्टकेषीकेत्यत्रैव तदंतविधिप्रसंगः ॥ नचेष्टापत्ति राम

५९

१५

॥ आन्महतः समानाधिकरणेत्यत्रापि तदंतविध्यभावापत्त्या परममहाजातीयो न स्यादिति ॥ रुरित्युकार इत्संज्ञः अतो रोरि
त्याद्यै विशेषणार्थं तत्फलं तु प्रातत्रेत्यादावुत्वनिवृत्तिरिति मूल एव स्फुटीभविष्यति ॥ अतो रोरप्लुतात् ॥ ननु परत्वाद्यत्वं स्या
दित्याशंक्याह ॥ भोभगो इति ॥ येन नाप्राप्तिन्यायादिति भावः ॥ यत्वस्यत्रैपादिकत्वेनासिद्धत्वादुत्वमित्यपि सुवचं ॥ ननु त्रैपादि
के रुत्वे तस्यासिद्धत्वादुत्वं कथं स्यादित्याशंक्याह ॥ उत्वं प्रतीति ॥ सामर्थ्यादिति ॥ ननु तरूमूलमित्यत्र रोरसिद्धत्वाभावादुत्वस्या
वकाशः ॥ नचाप्यवतोरोर्ग्रहणमिति नायं दोषः ॥ एवमपि रामरूहि इत्यत्रातिव्याप्तिरिति चेन्न ॥ उकारानुबंधविशिष्टस्यैव तत्र
ग्रहणात् ॥ नचात्रमानाभावः ॥ रोसुपीत्यत्राहो रेफविधानात् लिंगात् ॥ नचैवमयतस्यैवज्ञापकाद्रोः सिद्धत्वस्याप्युपपत्तौ र
मनूधेत्यादि मूलमसंगतमेवेति वाच्यं ॥ उकारानुबंधविशिष्टस्येह ग्रहणमित्यत्रार्थे तात्पर्यं विधानं लाघवात् ॥ नत्वसिद्धा
भावेपि गौरवात् ॥ नचार्थवत्परिभाषया रामोत्रेत्यत्रैव स्यान्नतु पयोत्रेत्यादाविति वाच्यं ॥ रुत्वविधानादेव तदनुपस्थि
तिज्ञापनात् ॥ इकोगुणवृद्धीति निर्देशाच्च ॥ नचैवमतोरोरित्यत्र हचे शित्फत्वं न स्यात् ॥ आश्रयपरगात्स्छान्पेरोसिद्धेत्वेपि
रामोहसतीत्यादौ कृतार्थत्वेन निमित्तभूतहशंशेऽसिद्धत्वस्य दुर्वारत्वादिति वाच्यं ॥ अनुकरणस्यासिद्धत्वात् ॥ प्रकृतिव
दनुकरणमित्यस्यात्वात् इति दिक् ॥ प्रथमयोः पूर्वः ॥ अत्र प्रथमयोर्वचनयोरिति नार्थः ॥ द्वि + भावा + वचनस्याहाभावात् ॥ अ +

१६

६०

नित्यं चीत्यनुवृत्त्या ऽ नाघोरे वैतत्सूत्रप्रवृत्तेः॥ न च शिवोऽर्च्य इत्यत्रोत्वे कृते जादिकं वचनद्वयमस्येवेति वाच्यं॥ नादिच्यातिनिषे
धात्॥ इकारांतादि स्थले सोरजरूपत्वाभावात्॥ न चैवमथोजसोरेवग्रहणमस्त्विति वाच्यं॥ प्रथमत्वव्याघातापत्तेः॥ किंचै
वमोजसोरित्येव लाघवाद्रूपात्॥ जस्सासाहचर्यात्प्रथमा द्विवचनमेव ग्राहिष्यति॥ अतः प्रथमयोरित्यस्याघविलक्ति द्वपेत्व
क्षाराणा॥ तिस्मात्तद्ध्व सोनः पुंसीत्यत्राव्यवहितत्र एवैस वाणीपरामर्शीकतच्छब्दोपादानान्नेत्यभिप्रेत्याह॥ प्रथमाद्वितीयमो
रिति॥ अचीति॥ इकोपराचीत्यतस्मादनुवृत्तेः॥ भोसगो॥ असंधिः सौत्र इति॥ पगोअघाशब्दयोरोकारस्याकारस्य च प्राप्ते य
वीरूपं सौत्रत्वान्नेत्यर्थः॥ ओकारांतानां भोशब्दादीनामकारस्य चानुकरणमाश्रित्येत उक्तं॥ पद्धातु भोर स गोर अघोर
इतिरेफांतानेवानुकृत्यपत्वलोपौ क्रियेते तदा ऽ संधिः न्याय एव॥ किं तु अलोत्यपरिभाषयोसोशब्दादीनामंत्यस्य यः स्या
द एवं स्परोः श्रपः स्यादिति वाक्यभेदो भवति॥ भोभगोअघोइत्यत्र षष्ठ्याः सौत्रत्वात् लुक् च वक्तव्य इत्यपरं गौरवमत उ
हंतानुकरणपक्ष एव समीचीनः॥ च न विभोरिदं षु प्रभागोपिस्य सुप्रभगोरिदं र घोरिदमित्यत्रातिप्रसंगो न यकस्यादंता
नुकरणोपि तुल्यत्वादिति वाच्यं॥ प्रतिपदोक्तानामोदंतानामनुकृतत्वात्॥ न चैनं लाक्षणिकत्वाविशेषादित्तोषामवत्तभा
वदघरतामोभावस्येति वार्त्तिकव्युत्पादितानां सूत्रे ग्रहणं स्यात् किंतु निपातानामेव ग्रहणं स्यादिति वाच्यं॥ व्युत्यतिपक्षे निपा राम

६०

१६

तानामपि प्रतिपदोक्तत्वाभावात्॥ तर्हि वार्त्तिकोक्तानामेव ग्रहणं स्यादिति वाच्यं॥ वार्त्तिकोक्तानां निपातानां च प्रतिपदो
क्तत्वाविशेषादुभयेषामपि सूत्रे ग्रहणाभ्युपगमात्॥ विशेषलक्षणाबोधितत्वं हि प्रतिपदोक्तत्वमेषामप्यस्ति॥ सामान्यलक्षणा
बोधितत्वं लाक्षणिकत्वं तच्च विभोरित्यादीनामस्तीति तेषां ग्रहणं निपातानामपि चादिषु विशिष्यैव साधकत्वेन बोधितत्वात्प्रतिप
दोक्तत्वमक्षतमेव॥ यत्तु सातरांतं वानुकृत्येत्याद्युक्तं युक्तं चैतद्धि सादिनांतरेव पक्षद्वयं समर्थितं कैश्चित्॥ तच्चिंत्य॥ आद्ये वार्त्ति
कोक्तानामग्रहणप्रसंगात्॥ न चेष्टापत्तिः॥ उत्तरग्रंथविरोधात्॥ द्वितीये वार्त्तिकोक्तानामग्रहणापत्तेः॥ तेषामरांतत्वस्य प्रतिपदो
क्तत्वात्॥ नन्विहाश ग्रहणं व्यर्थं॥ न च खरि पत्वस्याप्रवृत्त्यर्थं तदिति वाच्यं॥ तस्यासिद्धत्वाद्विसर्गरोऽव भाव्यमित्याशयेन पृच्छ
ति॥ अशि किंति॥ अस्तु विसर्गस्तस्य स्थानिवद्भावेन रुत्वाद्यत्वे खरि परतो पि इवीरमित्याशयेन प्रत्युदाहरति॥ देवोः संतीति
॥ ननु रोरित्युकारानुवंधत्वाद्रेफमात्रे विसर्गस्य स्थानितया च कथमत्र स्थानिवद्भावो भवेत्॥ अनल्विधाविति निषेधादित्याश
क्याह॥ न द्यपमिति॥ रेफमात्रस्यारुत्वे विरोधः सुपीत्यतोनुवर्त्तमानस्य रोरिति समुदायस्यातथात्वादित्याशयेन समाधत्ते॥
रोरितीति॥ यथा ग्रहीहित्यत्र यहो लिटीतीटो दीर्घत्वे कृते तस्य स्थानिवद्भावादिट ईटीतीटः परत्वमादायसिज्लोपो भवतीत
थेहापीति भावः॥ अत एव तस्थानिवत्सूत्रे विशिष्टं हेयोऽनल्माश्रयत इदं नामेत्युक्तं साप्यकृता॥ ननु रोरीत्यत्र उ इत्यस्य खरव

५७

६१ सानपोरित्यत्रानुवृत्त्यर्थंकृतस्वरितप्रतिज्ञस्यैवेहाप्यनुवृत्तिरस्तु मास्तु रोरित्यनुवृत्तेरावश्यकत्वात्॥ हलि सर्वेषामित्येत
द्वर्थं च तत्रैव स्फुटीकरिष्याम इति॥ निपाता इति॥ चादिराकृतिगणत्वादिति शेषः॥ एवं च निपातैरेवेष्टसिद्धौ विभाषा भव
द्विति नारंभसार्थ्यं॥ अन्यथा वार्त्तिकोक्तानामेवांगीकारे भोहरे इत्यादिसिद्धावपि भोहरिह रो भो विहद्धे रसो गं गे इत्यादौ
पुल्लिंगवद्विवचनयोः स्त्रीनपुंसकयोश्च रूपोसिद्धि प्रसंगः॥ संबुद्धौ परत एव वार्त्तिके नौत्वरूलयोर्विधानादिति वृत्तिकारा
भिप्रायेणेत्थं मूले उपनिबद्धं॥ वस्तुतस्तु उभयेषां ग्रहणमित्युक्तमेव॥ निपातेन सोः शब्देनैव भोहरिह रावित्यादि सि
द्धमिष्टं॥ नन्वेवमपि वार्त्तिकं व्यर्थं निपातैरेवेष्टसिद्धेरिति चेन्न॥ भोभवन्निह भवन्नु इतिवत् भोभोः हे सोरिति प्रयोगसिद्ध
येतदावश्यकत्वात्॥ अन्यथा स्युः पाट्प्याडंगाहे हे सोः इत्यमरोक्तानां संबोधनार्थकानां सह प्रयोगो न स्यादिति दिक्॥ स्युः
पाडित्यमरप्रयोगात्त्वपमपत्रतथैव लेखनाद्वेडुउपधस्येत्यत्र त्वमनोरमाग्रंथोः सुहृद्वेवेति ध्येयं॥ व्योर्लघु॥ वकार
यकारयोरिति॥ भोभगोअघोअपूर्वयोरित्यपि संबंधनीयं॥ लघुप्रयत्नशब्दं व्याचष्टे॥ लघूच्चारणाविति॥ सूत्रे प्रत्येका
भिप्रायेणैकवचनं तत्स्वशब्दांतरेणाविवृणोति॥ यस्योच्चारण इति॥ ओतोलघुप्रयत्नविधानवैयर्थ्यप्रसंगादलघु
प्रयत्नस्यैवायं लोप इत्याह॥ अलघ्वित्यादि॥ सच यकारस्यैव न तु वकारस्यासंभवादित्याह॥ यकारेति॥ व्योरितिसमास राम

६१

५७

निर्दिष्टेप्येकदेशस्यैवस्वरितत्वं प्रतिज्ञायत इति भावः॥ स्यादेतत्॥ गांवातीति गोवास्तमाचक्षाणो गोवुगोवत्रेत्यत्र
वकारो यितादृशः संभवस्यैवेति कथमसंभव इति चेन्न॥ भोभगोअघोइत्यनुवर्त्य तत्पूर्वस्य लोपविधानांगीकारात्॥ नहि
तत्पूर्वको वकारः संभवति॥ न चैवमोतः इति व्यर्थमिति वाच्यं॥ अपूर्वस्येत्येतन्निवृत्त्यर्थत्वेन तदावश्यकत्वात्॥ एवं च पदांते
किंतोयमिति मूलमसंगतमेव॥ उत्तरत्र हलि सर्वेषामित्यत्र तेषामनुवृत्तिमंगीकृत्येह सूत्रे तदनंगीकारस्य निर्मूलत्वात्॥ वृत्तौ
तु तादृक्प्रत्युदाहरणाभावाच्च॥ लोपः शाकल्यस्येत्यनेनैव गतार्थत्वमाशंक्याह॥ नित्यमिति॥ उञि च॥ इह भोभगोइति
नानुवर्त्तते॥ किंत्वेवं स्यैवेत्याशयेनाह॥ अवर्णाद्यवर्णयोरिति॥ इहावर्णपूर्वयोर्व्योः संभवादुक्तपदमनुवर्त्तत इत्याह॥
यवयोरिति॥ वकारोदाहरणांतु वृक्षवृक्षसउरुकाप्रिरिति॥ वेञ इति॥ वेञ् तंतुसंताने॥ संप्रसारणा इति॥ वचिस्वपिय
जादीनां कितीत्यनेन॥ उत्तरार्थमिति॥ उ मोङ्ङ्स्वादर्वीत्यतदर्थं॥ तत्र हि हरिंडिनाशाकरिनेत्यत्रातिव्याप्तिवारणाया

१८

६२

ज्ञादेोपदइतिव्याख्येयं॥ नचतत्पदइत्यनुवृत्तिमंतरेणासंभवतीत्याकरः॥ वस्तुतस्तु ह्रस्वात्परोयोङम्तदंतं
यत्पदमितिव्याख्यानेपूर्वोक्तातिप्रसंगाभावात्पदग्रहणानुवृत्तिर्व्यर्था॥ एवंतर्हिहलिसर्वेषामित्यत्रैवप्रयोजनंद्र
ष्टव्यं॥ तत्रहिपदस्येत्यनुवृत्तावपिपदइत्यस्याप्यनुवृत्तिरवश्यमुपेया॥ अन्यथावृक्षयतेर्विंच्यवःपरस्मिन्निति
टिलोपस्यास्थानिवद्भावाद्वलिलोपाभावेवृक्षविति रूपेततोभ्यामादौवृक्षवृक्षिःवृक्षवूरेशाइत्यत्रहलिसर्वेषा
मित्यनेननित्योलोपःस्यात्॥ नचतस्मिन्कर्तव्येटिलोपस्यस्थानिवत्त्वंशंक्यं॥ पूर्वत्रासिद्धेतन्निषेधात्॥ पदइत्य
नुवृत्तौतुहलादौपदइतिव्याख्यानान्नकश्चिद्दोषइति॥ ननुवेञः क्विपिसंप्रसारणेसंप्रसारणाच्चेतिपूर्व
रूपेतुकिंचसतिउइतिरूपं॥ नचषत्वतुकोरसिद्धइतिपूर्वरूपस्यासिद्धत्वान्तुक्नस्यादितिवाच्यं॥
पदांतपदाद्योरेकादेशोऽसिद्धइतिराद्धांतात्॥ अधीत्येतियथा॥ तथावतंत्रपुदित्यत्रपदसंज्ञकस्याप्यु

राम

६२

१८

ज्ञःसत्वादिहार्थमपिपदग्रहणमस्तु॥ प्रतिपदोक्तपरिभाषाप्यतएवनप्रवर्त्ततइतिसल्लोक्त
मसंगतमितिचेत्सत्यं॥ भाष्यकारेणैवोत्तरार्थत्वस्योक्तत्वात्तदनुरोधेनतंत्रपुदित्यत्रापिलोपोने
ष्यतइत्येवकल्पयितुंशक्तमि॥ तिदिक॥ हलिसर्वेषां॥ यकारस्येति॥ पदांतस्येत्यर्थः॥ नवोरस्य
नेहानुवर्त्तते॥ भोभगोअघोपूर्वस्यासंभवात्॥ वृक्षवृकरोतीत्यादावपूर्वस्यापिसंभवेभोभगो
इत्यतोशीत्यनुवर्त्यशाहलोविशेषणात्तल्लोपाप्रसंगः॥ नचैवंहलीतिव्यर्थं॥ देवाइहदेवापि
हेत्यादौनित्यलोपाभावापत्तात्॥ मोनुस्वारइत्येतदर्थतयातदावश्यकत्वाच्च॥ नन्वेवमपि

१२

६२ वृक्षवृहसतीत्यत्रलोपः कुतोनेतिचेत् अनभिधानात्॥ एतच्चहरदत्तानुरोधेनोक्तं ॥व
स्तुतस्तुवकारोप्यत्रानुवर्त्तते॥ नचैवंवृक्षवृहसतीत्यत्रातिप्रसंगः॥ इष्टापत्तेः॥ अ
नभिधानाच्चपरोमानाभावात्॥ अशिहलीतिव्याख्यापक्षेवृक्षवकरोतीत्यत्रातिप्रसंगोनेति
वक्ताभाष्यकृतासहविरोधाच्च॥ तस्मादुकारोप्यनुवर्त्ततएवेतितत्वं॥ नचदेवानम्प्राइत्यादौ
लोपोव्योर्वलीतिसिद्धो किमनेनेतिवाच्यं॥ तंप्रतिपत्वस्यासिद्धत्वात्॥ देवापातीत्यत्रवल
परत्वासंभवेनप्रकृतसूत्रस्यैवावश्यकत्वाच्चेति॥ रोसुपि॥ रोरप॥ ॥ ॥ राम

६२

सिद्धान्तरत्नाकर

२६

```
[OrderDescription]
,CREATED=19.07.19 16:13
,TRANSFERRED=2019/07/19 at 16:31:31
,PAGES=53
,TYPE=STD
,NAME=S0001036
,Book Name=M-1985-SIDHDANTRATNAKAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
```

```
FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,
```